यः । दुष्टानां भूपतिः शत्रुः कुलटानां पतिव्रता । साधुः खलानां शत्रुः स्यात् मूर्खानां बोधको रिपुः" ।

**सहखण्डक** न० पक्वमांसभेदे "छागादेर्मांसमुद्धृत्य कुट्टितं खण्डितं पुनः । शुद्धमांसविधानेन पचेदेतत् सहखण्डकम्" भावप्र० ।

**सहदेव** पु० सह दीव्यति दिव–अच् । १माद्रीसुते पाण्डवभेदे मेदि० २बलायां ३दण्डोत्पले ४शारिवौषधौ च स्त्री मेदि० टाप् । ५सर्पाक्ष्यां स्त्री मेदि० ङीष् ङीषन्तः । ६पीतदण्डोत्पलायां रत्नमा० ।

**सहदेव्यादि** पु० "सहदेवी बला चैव शतमूली शतावरी । कुमारी च गुडूची च सिंही व्याघ्री तथैव च" गरु० पु० ४८अ० प्रतिष्ठाङ्गदेवस्नानीयद्रव्यगणभेदे ।

**सहधर्मिणी** स्त्री सह समानो वा धर्मोऽस्त्यस्या इनि । १पत्न्याम् अमरः "सहधर्मं चरेयाताम्" इति मनूक्तेः सहधर्मचारित्वात् "शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा" दायभा० उक्तेश्च तस्याः पतिकृतधर्मफलभागित्वाच्च तथात्वम् ।

**सहन** न० सह–ल्युट् । १क्षमायां तितिक्षायां शीतोष्णादिद्वन्द्वधर्मसहने हेमच० । सह–ल्यु । २सहिष्णौ अमरः ३क्षमाशीले त्रि० मेदि० ।

**सहपान** न० सह पानम् । एकत्र मद्यादिपाने हेमच० । २तुल्यपाने अमरः । [त्रिका० ।

**सहपांशुकिल** पु० सह पांशुभिः किलति किल–क । वयस्ये

**सहभाविन्** त्रि० सह भवति भू–णिनि । सहाये स्त्रियां ङीप् । [अमरः ।

**सहभोजन** न० सह एकत्र भोजनम् । एकत्रस्थानेऽशनादौ

**सहम** न० नील०ता० उक्ते दिवारात्रिभेदेन परस्परं योगवियोगयुतग्रहविशेषेण युतेन लग्नादिनानीते पुण्यादिशुभादिचिन्तनस्थाने राशिभेदे तानि च पञ्चाशत् तदानयनं तत्फलानि च तत्रोक्तानि यथा

"पुण्यं गुरुज्ञानयशोऽथ मित्रं माहात्म्यमाशा च समर्थता च । भ्राता ततो गौरवराजताता माता सुतो जीवितमम्बु कर्म । मान्द्यं च मन्मथकली परतः क्षमोक्ता शास्त्रञ्च बन्धुसहमं त्वथ बन्धकञ्च । मृत्योश्च सद्म परदेशधनान्यदारा स्यादन्यकर्म सवणिक् त्वथ कार्य्यसिद्धिः । उद्वाहसूतिसन्तापश्रद्धाप्रीतिर्बलं तनुः । जाड्यव्यापारसहमे पानीयपतनं रिपुः । शौर्य्योपायदरिद्रत्वं गुरुताम्बुपथाभिधम् । बन्धनं दुहितेत्यादि पञ्चाशत् सहमानि हि । सूर्य्योनचन्द्रान्वितमह्नि लग्नं रवीन्दुयुक्तं निशि पुण्यसंज्ञम्१ । शोध्यस्वशुद्धयाश्रयभान्तराले लग्नं न चेत् सैकभमेतदुक्तम् । व्यत्यस्तमस्मात् गुरु२विद्ययो३स्तु संसाधनं पुण्यवियुक् सुरेज्यः । दिवा विलोमं निशि पूर्ववत्तु यशोभिधं४ तत् सहमं वदन्ति । पुण्यसद्म गुरुसद्मतस्त्यजेत् व्यत्ययो निशि सिताज्वितं च तत् । सैकतात्तनुवदुक्तरीतितो मित्रनामसहमं५ जगुर्बुधाः । पुण्याद्भौमं शोधयेदुक्तरीत्या माहात्म्यं६ तत्तत्स्यात् क्वचिद्विलोमम् । शुक्रं मन्दादह्नि नक्तं विलोममाशाख्यं७ स्यादुक्तवच्छेषमूह्यम् । सामर्थ्य८मारात्तनुपं विशोध्य नक्तं विलोमं तनुपे कुजे तु । जीवाद्विशुद्धे सततं पुरावत् भ्राता९र्किहीनात् गुरुतः सदोह्यः । दिने गुरोश्चन्द्रमपास्य नक्तं रविं क्रमादर्कविधू च देयौ । रीत्योक्तया गौरव१०मर्कमार्केरपास्य वामं निशि राज्यतातौ११।१२ । माते१३न्दुतोऽपास्य सितं विलोमं नक्तं सुतो१४ऽह्नि निशमिन्दुमीज्यात् । स्याज्जीविताख्यं१५ गुरुमार्कितोऽह्नि वामं निशीदं सममम्बयाम्बु१६ । कर्म१७ कुमाराज्जिनिशि वामसुक्तं रोगाख्य१८मिन्दुं तनुतः सदैव । स्यान्मन्मथो१९ लग्नपमिन्दुतोऽह्नि वामं निशीन्दुं तनुपं सदाकीत् । कलि२० क्षमे२१स्तो गुरुतो विशुद्धे कुजे विलोमं निशि पूर्वरीत्या । शास्त्रं२२ दिने सौरिमपास्य जीवात् वामं निशि ज्ञेन युते पुरावत् । दिवानिशं ज्ञाच्छशिनं विशोध्य बन्ध्वाख्य२३मेतन्निशि बन्धकं२४ स्यात् । वामं दिवैतत् मृति२५रष्टमर्क्षादिन्दुं विशोध्योक्तवदार्कियोगात् । देशान्तराख्यं२६ नवमाद्विशोध्य धर्मेश्वरं सन्ततमुक्तवत् स्यात् । अहर्निशं वित्तपमर्थभावाद्विशोध्य पूर्वोक्तवदर्थसद्म२७ । सितादपास्यार्कमथान्यदाराह्वयं२८ सदा प्राग्वदथान्यकर्म२९ । चन्द्राच्छनिं वाममथो निशायां शश्वद्वणिज्यं३० दिनबन्धकोक्त्या । शनेर्दिवार्कं निशि चन्द्रमार्के विशोध्य सूर्य्येन्दुमनाथयोगात् । स्यात् कार्य्यसिद्धिः३१ सततं विशोध्य मन्दं सितात् स्यात्तु विवाहसंज्ञम्३२ । गुरोर्बुधं प्रोह्य भवेत् प्रसूति३३र्वामं निशीन्दुं शनितो विशोध्य । षष्ठं क्षिपेदुक्तदिशा सदैव सन्तापसद्म३४ऽऽत्मपास्य शुक्रात् । श्रद्धा३५ सदा प्रोक्तदिशाथ पुण्यं विद्याख्यतः प्रोह्य सदा पुरोक्त्या । प्रीत्याख्य३६मुक्तं बल३७देह३८सं३९ज्ञं यशस्४० जाड्यं समपास्य भौमात् । शनिं विलोमं